International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(6): 221-223
© 2025 IJMH
www.themultijournal.com
Received: 07-12-2025
Accepted: 27-12-2025
Publish : 30-12-2025

**DR. PRABIR DHALL**
Paschim medinipur,
West Bengal

**Correspondence:**
**DR. PRABIR DHALL**
Paschim medinipur,
West Bengal

# दर्शनेषु उपाधिविचारः

**DR. PRABIR DHALL**

**प्रस्तावना –**

भारतीयदर्शनपरम्परा विश्वे अद्वितीया इति सर्वविदितम्। अस्याः परम्परायाः मूलाधारः संस्कृतभाषा एव, या न केवलं वाङ्मयस्य वहिका, अपि तु ज्ञानविज्ञानयोः अमूल्यनिधिः अपि अस्ति। दर्शनशास्त्रेषु वस्तुतत्त्वस्य सूक्ष्मविश्लेषणं क्रियते, यत्र प्रत्यक्षानुमानादिप्रमाणैः सत्यस्य अनुसन्धानं भवति। एतेषु दर्शनेषु न्याय-वैशेषिक-सांख्य-योग-वेदान्तादिषु ‘उपाधि’ इति संकल्पना विशेषतया महत्त्वपूर्णा दृश्यते। ‘उपाधि’ शब्दः तात्त्विकदृष्ट्या अत्यन्तं गूढार्थयुक्तः अस्ति, यः वस्तुनः यथार्थस्वरूपस्य बोधे बाधकत्वेन वा सीमांकनकारणेन वा कार्यं करोति। विशेषतः अनुमानप्रक्रियायां उपाधेः विचारः अनिवार्यः, यतः सः हेतोः यथार्थव्याप्तिं निर्धारयति। उपाधियुक्तहेतुः व्यभिचारदोषं जनयति, अतः तर्कशास्त्रे अस्य निरसनं अत्यावश्यकं मन्यते।

न्यायवैशेषिकदर्शने उपाधिः साध्यव्यापकत्वे सति साधनाव्यापकत्वेन परिभाषिता, यदा तु वेदान्तदर्शने सा अविद्यारूपेण ब्रह्मणि आरोपकारणत्वेन निरूप्यते। एतत् भेदद्वयं दर्शयति यत् उपाधेः स्वरूपं विभिन्नदर्शनेषु भिन्नरीत्या अवगम्यते। अतः अस्मिन् लेखे विभिन्नदर्शनेषु उपाधेः स्वरूपं, लक्षणं, प्रकाराः तथा तस्य तात्त्विकप्रभावः इत्यादीनां सम्यक् विवेचनं क्रियते। एषः विषयः केवलं तर्कशास्त्रपरिधौ न सीमितः, अपि तु सम्पूर्णभारतीयदर्शनस्य गहनतत्त्वबोधाय अत्यन्तोपयोगी इति।

संस्कृतिमूलं संस्कृतम्। संस्कृतं भारतीय संस्कृतेः आत्मा। दर्शनं संस्कृतिवाहकमस्ति। संस्कृतभाषायाम् एव सर्वविध दर्शनानां तथा अमूल्यग्रन्थानां वर्तते। अतएवोच्यते –

**“संस्कृतं संस्कृतेर्मूलं ज्ञानविज्ञानवारिधिः।**

**बेद तत्वार्थसंजुष्टं लोकालोकेत्तरं शिवम्”।।**

बेद बेदाङ्गातिरिक्त दर्शनशास्त्रेषु आस्तिक नास्तिक ग्रन्थानामुपलब्धिः संस्कृतसाहित्ये यथा दृकगोचरीभुतः नान्यत्र कुत्रापि। बेदप्रामान्यं स्वीकृतवन्तः आस्तिकैः तथा नास्तिकैः दार्शनिक बाङमयस्य निर्माणं कृतम्। भारतीय दर्शनेषु षडास्तिक दर्शनानि त्रीनि च नास्रिक दर्शनानि प्रथितानि सन्ति। दृश्यते बस्तु प्रत्यक्षीक्रियते अनेन इति दर्शनम्।

**अनुमानम्–**

अनु-पश्चात् (पदार्थस्य ज्ञानस्य परम् जायमानम्) मितिः ज्ञानम्। लिङ्गपरामर्शोऽनुमानम्। येन हि अनुमीयते तदनुमानम्। लिङ्गपरामर्शेन चानुमीयतेऽ तो लिङ्गपरामर्शोनुमानम्।

**व्याप्तिः**-‘साध्यवदन्यस्मिन्नसमन्ध व्याप्तिः’।

यत्र साध्यः तिष्ठति तत् अधिकरणात् ऋते अन्यत्र हेतोः अवृतित्वः समन्धस्य वा अभावः अव्याप्तिः इति अभिहितः। “पर्वतो बह्निमान् धूमात्” अनुमान् वाक्ये साध्यः वह्निः, हेतुः धूमम्, साध्यः वह्नेः अधिकरणात् भिन्नस्थानम् जलह्रदः प्रभृतिः। साध्यः वह्नेः अभावस्य अधिकरणे हेतुः धूमस्य अयम् अविद्यमानतायै धूमे वह्नेः व्याप्तिः सिद्धति। अर्थात् व्याप्ताः लक्षणस्य समन्वयम् भवति।

**उपाधिः-**

उप-समीपवर्तिनि आदधाति स्वीयं धर्मम् इति उपाधि। निकषाअन्यपदार्थ यः स्वधर्मज्ञस्य आदधाति सः पदार्थैव उपाधिः। यथा जवाकुसमम् स्वसमीपे स्फटिकस्वधर्मम् लौहित्यस्य आधानं करोति, तर्हि जवाकुसुमम् उपाधिः।

**न्याय-वैशेषिकमतानुसारेः-**

'साध्यव्यापकत्वे सति साधनाव्यापकत्वम्' अर्थात् यः पदार्थः साध्यस्य व्यापकम् हेतोः च अव्यापकम् तत् उपाधिः। साध्यस्य व्यापको यस्तु हेतोरव्यापकस्तथा स उपाधिः साध्यरुपे यस्य निर्दिष्टम् भवति तत् साध्यसव्यापकम्, परन्तु साधनरुपे यस्य उपस्थापितं तस्य अव्यापकम् यः पदार्थः त्वमेव उपाधिः भवति।

**लक्षणस्य सार्थकताः-**

"साध्यव्यापकत्वे सति साधनाव्यापकत्वम्" इदम् लक्षणे यदि प्रथमांशम् न तिष्ठति, अर्थात् साधनाव्यापकत्वम् अयमेव उक्तम् तर्हि शव्दः अनित्यः कार्यत्वात् इदम् सदनुमाने सावयवत्वः उपाधिः भविष्यति। पूर्वे वदति, यत् अनुमाने हेतो व्यभिचारदोषः तिष्ठति, तत् अनुमानैव उपाध्याः सत्ता सम्भावास्ति।शव्दः अनित्यः कार्यत्वात् घटवत् इदम् अनुमाने व्याभिचारदोषः नास्ति। सुतरां अत्र उपाधिः नास्ति।परन्तु उपाधेः लक्षणे साध्यव्यापकत्व इदम् पदम् न वदति, तर्हि सावयवत्वः उपाधिः भविष्यति। अत्र साधन् हेतुः वा कार्य्यत्वः भवति। यत्र यत्र कार्यत्वः अस्ति तत्र तत्र सावयवत्वः नास्ति उत्पन्नम् गुणे कर्म्मणि च कर्य्यत्वः अस्ति। किन्तु सावयवत्वः अयम् गुणे कर्म्मणि च नास्ति। सावयवत्वः केवलम् जन्यद्रव्यैव तिष्ठति। सुतरां इदम् अनुमाने सावयवत्वमं उपाधिः वदन् अनभिप्रेतः। अस्मै उपाधिः लक्षणे साध्यव्यापकत्वे सति वदिष्यति। सावयवत्वः कार्य्यत्वः हेतोः अव्यापकम् भुत्वापि साद्यानित्यत्वस्य अव्यापकम्। यत्र यत्र अनत्यि तिष्ठति। परन्तु तत्र सावयवत्वः न तिष्ठति। सुतरां शव्दः अनित्यः कार्यत्वात् इदम् वाक्ये सावयवत्वस्य पादेः लक्षणे साद्यव्यपकत्वे सति वदिष्यति। यदि साध्यव्यापकत्वम् उपाधिः रुपस्य लक्षणम् कृत्वा, लक्षणेसाधनाव्यापकत्वम् इदम् पदम् न यच्छति, तर्हि उक्तानुमाने प्रमेयत्वः उपाधिः भविष्यति। अनित्यत्वः साध्यस्य व्यापकम् प्रमेयत्वः भवति। यत्र अनित्यत्वः तिष्ठति, तत्र प्रमेयत्वः तिष्ठति। किन्तु प्रमेयत्वः उपाधिः न भवति, प्रमेयत्वस्य उपाधित्वेः साधनाव्यापकत्वम् वदिष्यति।

**प्रकारभेदमः-**

उपाधिः भेदद्वयम् यथा निश्चितः सन्दिगद्धश्च। पर्वतः धूमवान् वह्नेः अत्र अग्न्म् हेतुः धूमम् साध्यः उक्तम् दृष्टा यत्र एव धूमम् (साध्याः) अस्ति तत्र एव आद्रेन्धनसंयोगः अपि अस्ति तु यत्र एव अग्निः (हेतुः) अस्ति, तत्रैव आर्दन्धनः धूमम् साध्यस्य व्यापकम् हेतुः साधनस्य अव्यापकश्च, तर्हि आद्रेन्धनः उपाधिः भवति। अयम् उपाधिःनिश्चितः उपाधिः। स श्यामः मित्रातनयत्वात् मित्रा नाम्नी महिलायाः प्रथमोत्पन्नम् कतिपयाः पुत्राः श्यामवर्ण भवति। तत्परम् मित्रा इति गर्भवति भवति, किंवा देशान्तरे पुत्रस्य जातम् भवति। यः मित्रायाः श्यामवर्णानि पुत्रान् दृष्टा, सः यदि मित्रायाः गर्भस्था देशान्तरे वा जातम् पक्षे अनुमानम् कृत्वा सः श्यामः मित्रातनयत्वाय मित्रातनयत्वे श्यामत्वस्य सहचारदर्शनं कृत्वा व्याप्तिग्रहनार्थं मित्रायाः गर्भस्था देशान्तरे जातम् पुत्रम् श्यामवर्ण उक्तम् पुत्रस्य श्यामवर्णत्वे मित्रातनयत्वम् एव हेतुः करोति। यत्र यत्र मित्रा-तनयत्वम् तत्र तत्र श्यामत्वम् अयम् व्याप्तौ मित्रायाः श्यामवर्णानि पुत्रान् एव उदाहरणम् भवति। तर्हि उक्तानुमाने मित्रातनयत्व हेतुः सोपाधिकम् भविष्यति। मित्रातनयत्वं श्यामत्वस्य अनुमापकम् नास्ति,उक्तानुमाने शाकपाकजन्यत्वमेव उपाधिः। आयुर्वेद इति शास्त्रे अस्ति यादृग्वर्णम् आहारणम् उपसेवते गर्भिनी तादृग् बर्णा प्रसवा भवति। अर्थात् गर्भवतिः महिला या वर्मविशिष्टाचार्य्यं ग्राहयति त्वया पुत्रः तादृशवर्णः विशिष्ट भवति। मित्रा शाकादिश्या-वर्णाहार्य्यस्य ग्रहणम् अकरोत् तत् तस्याः पुत्रा श्यामवर्णं भवति।

उक्तानुमाने शाकपाकजन्यत्वं उपाधिः भवति। यत्र श्यामत्वं तत्र शाकपाकजन्यत्वं तिष्ठति। तु यत्र मित्रातनयत्वं तत्र श्यामत्वं न तिष्ठति साद्यस्य व्यापकम् हेतुः च व्यापकम् भुत्वा शाकपाकजन्यत्वः अपि उपाधिः।

**वेदान्तमतानुसारेणः-**

यत् बस्तुना सह अन्वितम् न भुत्वा अपि तत् बस्तुम् पृथकम् वस्तोः भिन्नम् रुपस्य बोधयति, तर्हि उपाधिः। समष्टिज्ञानानि अत्र उपाधिः वदन्ति। यम् समीपे पदार्थम् स्वधमम् आदधाति तत् उपाधिः वदति। असज्ञब्रह्मे अज्ञजानम् स्वस्य कर्तृत्वा धर्मस्य आरोपं करोतितर्हि अत्र अज्ञानम् उपाधिः वदति। इदम् अज्ञानाय एव इश्वरम् जगतः स्रष्टा प्रभृतिः गुणम् अस्ति उदित्वा प्रकाशितम् भवति।

**भाषमानम् बेदान्तः-** उपाधिश्चकार्यान्वयीव्यावर्तको वर्तमानश्च।

**बेदान्तः** कल्पतरुकारस्य उक्तम् – वात् कार्यमवस्थायबेदहेतोरुपा-धिता, कदाचित् कतया भेदधीहेतुरुप लक्षणम्।

**उपसंहारः-**

उपाधेः लक्षणम् अस्ति यत् - साध्यव्यापक्त्वे सति साधनाव्यापक-व्यम् (तर्कसंगहः) अर्थात् यः पदार्थः साध्यस्य व्यापकः साधनस्य च अव्यापकः। उपाधियुक्तः हेतुः व्याभिचारः हेतुः। तर्कसंग्रहकारः अन्नंभट्टः सोपाधिकहेतुं व्यापात्वासिद्धः हेत्वाभासः इति अवदत्। अनुमाने उपाधिः न भवेत्। यथा - पर्वतः पक्षः, धूमः साध्यः, बह्निः हेतुः। अत्र हेतुः आर्द्रेन्धनसंयोगरुप उपाधिविशिष्टः। यतः आर्द्रेन्ध-नसंयोग साध्यधूमस्यव्यापकः अर्थात् यत्र यत्र धूमः अस्ति तत्र तत्र आर्द्रेन्धनसंयोगः अस्ति। अत्र आर्द्रेन्धनसंयोग हेतोः बह्नेः अव्यापकः अर्थात् बह्नाधिकरणे सर्वत्र आर्द्रेन्धनसंयोगः नास्ति, तप्तः लौहपिण्डिः इत्यस्य हेतो उदाहरणम्।

उपाधिविचारः भारतीयदर्शनपरम्परायां अत्यन्तं सूक्ष्मः तथा गहनः विषयः इति निष्कर्षतः ज्ञायते। विभिन्नदर्शनेषु अस्य भिन्ना व्याख्या दृश्यते, तथापि सर्वत्र अस्य प्रमुखं कार्यं वस्तुनः यथार्थस्वरूपनिर्णये सहायकरूपेण एव भवति। न्याय-वैशेषिकदर्शने उपाधिः हेत्वनुमानयोः शुद्धतां रक्षितुं आवश्यकः तत्त्वः अस्ति, यतः उपाधियुक्तहेतुः व्यभिचारदोषयुक्तः भवति। अतः यथार्थानुमानस्य सिद्धये उपाधेः निरसनं कर्तव्यम्।

अन्यतः वेदान्तदर्शने उपाधिः अविद्यारूपेण ब्रह्मणः सीमितप्रतिभा-सस्य कारणं मन्यते। अत्र उपाधिः न केवलं तर्कशास्त्रीयपदार्थः, अपि तु आध्यात्मिकबन्धनस्य मूलकारणम् अपि अस्ति। उपाधिनिवृत्त्या एव जीवस्य ब्रह्मात्मैक्यज्ञानं सम्भवति, इति वेदान्तसिद्धान्तः।

एवं दृष्टे सति उपाधिः केवलं तर्कप्रक्रियायां न, अपि तु समग्र-दर्शनचिन्तने महत्त्वपूर्णं स्थानं धारयति। अस्य सम्यगवगमनेन न केवलं युक्तिविचारः शुद्धः भवति, अपि तु तत्त्वज्ञानस्य अपि द्वारं उद्घाट्यते।

अतः उपाधेः अध्ययनं दार्शनिकानां कृते अनिवार्यम्, यतः तेन सत्यासत्यविवेकः सुस्पष्टः भवति। अन्ततः उपाधिविमर्शः मानवस्य ज्ञानविकासाय, तर्कशुद्धये, आत्मबोधाय च अत्यन्तं उपकारकः इति निःसंशयं वक्तुं शक्यते।

**सन्दर्भग्रन्थसूची**

❖ **संस्कृतग्रन्थाः -**

१. **तर्कसंग्रहः -** श्रीनारायणचन्द्र गोस्वामी, संस्कृत पुस्तक भाण्डार, विधान सरणी, कलकाता, १४१०

२. **पातञ्जलदर्शनम् -** अध्यापकअमितभट्टाचार्यः, संस्कृतवुकडिपो, वधानसरणी, कलकाता, २०२१

३. **पातञ्जलयोगदर्शनम् –** डा.विमलाकर्णाटक, काशीहिन्दुविश्व-विद्यालय, रत्नाप्रकाशन, वाराणसी, ९२

४. **भारतीयदर्शनम् -** डा.समरेन्द्रभट्टाचार्यः, वुक सिण्डिकेट प्राइभेट लिमिटेड, ३५ कलेज स्ट्रीट, कलकाता, २०१२

५. **वेदान्तसारः -** लोकनाथ चक्रवर्ती, पश्चिमवङ्ग राज्य पुस्तक पर्षत्, कलकाता, २०११

६. **सांख्यकारिका -** पूर्णचन्द्र वेदान्तचुञ्चु, पश्चिमवङ्ग राज्य पुस्तक पर्षत्,कलकाता, १९०१

७. **सांख्यदर्शनम् -** डा.गजानन शास्त्री, चौखम्भा संस्कृत संस्थान, वाराणसॉ, वि. सं. २०६५

८. **संस्कृतवाङ्मयान्तःप्रवेशिका -** डा. सोमनाथदाशः, चौखम्बा-संस्कृतप्रतिष्ठान, वाराणसी, २०२२